दिनाङ्क :- 09.06.2025 सायम् :- 06:20

## आदौ-मुख्यवार्ता:

- भारतस्य प्रगत्याः आधारशिलारूपेण विगतैकादशवर्षेषु सर्वकारः महिलानां नेतृत्वं विकासं पुनःपरिभाषितवानिति प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम्।
- सिक्किम्-प्रशासनम् भूस्खलनेन पीडितात् चटेन् इत्यतः विशेष-उदग्रोड्डयन-माध्यमेन मार्गेऽवरुद्धान् स्थानीयान्, चालकाञ्च रक्षति।
- विदेशमन्त्री डा. एस्. जयशङ्करः फ्रान्स-यूरोपीय-आयोगस्य च समकक्षैः सह द्वैपाक्षिकं संवादं करिष्यति।
- अमेरिकादेशे अनधिकृतप्रवासिनामुपरि कृताक्रमणानन्तरं राष्ट्रपतिना डोनाल्ड् ट्रम्प् इत्यनेन लास् एन्जलस्-नगरे नेशनल्-गार्ड् इत्यस्य सैनिकानां नियोजनस्य आदेशो दत्तः।

अस्य वर्षस्य फ्रेञ्च्-ओपन्-टेनिस् इति क्रीडायां, इटालियन्-युगलः सारा इर्रानी, जास्मिन् पावोलिनी च महिलानां डबल्स् इति उपाधिं प्राप्तवत्यौ।

## प्रधानमन्त्री नारी शक्तिः

प्रधानमन्त्री नरेन्द्रमोदी अद्य अवदत् यत् सर्वकारः गतैकादशवर्षेषु प्रभावपूर्ण-उपक्रमाणां श्रृङ्खलायाः माध्यमेन महिलानां नेतृत्वस्य विकासं पुनःपरिभाषितवान्। केन्द्रस्य एन्. डी. ए. सर्वकारस्य कार्यकालस्य एकादशवर्षपूर्ताविधौ श्रीमोदी विकसितभारतस्य यात्रायां महिलानां परिवर्तनशीलां भूमिकाम् आरेखितवान्। सामाजिक-प्रसारमाध्यमे, प्रधानमन्त्री पुनः दृढीकृतवान् यत् सर्वेषु क्षेत्रेषु, यथा विज्ञान-शिक्षा-क्रीडा-नवोद्योग-सशस्त्रसेनादिषु च, अनेकाः महिलाः उत्कृष्टतां प्रकटयन्त्यः सन्तीति।

## सिक्किम-निष्कासनम् :

सिक्किम- प्रशासनेन अद्य भूस्खलन-ग्रस्त-मङ्गन-मण्डलस्य चाटेन इति नगरात् विशेष-उदग्र विमानसेवया आहत्य अष्टाविंशति जनानां समुद्धारो विहितः। सर्वे निष्कासिताः पाक्योङ्ग् ग्रीनफील्ड् विमानस्थानकं यावत् सुरक्षिततया प्रापिताश्च । कार्यमिदं सामान्यमार्गसंपर्कक्षेत्रे प्रवेशावरोधानन्तरं अद्यतनप्रतिकूलपरिस्थिति- दृष्ट्या क्रियमाणानां समन्वितानां साहाय्योद्धार-प्रयासानां च भागः आसीत्।

## विदेशमन्त्रिणः यूरोप् भ्रमणम्

विदेशमन्त्री डा. एस्. जयशङ्करः अद्यारभ्य फ्रान्स्-यूरोपीय-सङ्घस्य, बेल्जियम्-देशस्य च सप्तदिवसीयायां आधिकारिकयात्रायाम् अस्ति। फ्रान्स्-देशस्य प्रवासकाले विदेश-कार्यमन्त्रिणः फ्रान्स्-देशस्य यूरोप् अथ विदेश-कार्यमन्त्रिणा जीन् नोयॆल् बैरोट् इत्यनेन सह द्वैपाक्षिक-चर्चा भविष्यति। सः फ़्रान्स्-देशस्य वरिष्ठनेतृत्वेन सह अपि सम्मिलितो भविष्यति, अपि च चिन्तकैः, प्रसारमाध्यमैश्च सह संवादमपि करिष्यति। डा. जयशङ्करः

आदौ भूमध्यसागरीय-रैसिना-संवादेऽपि भागं ग्रहीष्यति। अत्रान्तरे यूरोपीयसङ्घस्य यात्रायां डा. जयशङ्करः यूरोपीयसङ्घेन सह व्यूहात्मकसंवादम् आचरिष्यति। डा.जयशङ्करः यूरोपीय-आयोगस्य, यूरोपीयसंसदस्य च वरिष्ठनेतृत्वेन सह अपि संवादं स्थापयिष्यति। बेल्जियम्-देशस्य भ्रमणकाले मन्त्री बेल्जियम्-देशस्य उपप्रधानमन्त्रिणा विदेशमन्त्रिणा च म्याक्सिम् प्रीवोट् इत्यनेन सह द्वैपाक्षिक-परामर्शं करिष्यति। बेल्जियम्-देशस्य वरिष्ठनेतृत्वेन सहापि सः मिलिष्यति। सः भारतीयसमुदायस्य सदस्यैः सह अपि संवादं करिष्यति। विदेशमन्त्रालयः एकस्मिन् वक्तव्ये अवदत् यत् इयं यात्रा यूरोपीयसङ्घेन, फ़्रान्स्-बेल्जियम्-देशैः सह भारतस्य मैत्रिसम्बन्धान् इतोऽपि प्रगाढतरं करिष्यतीति अपेक्षते, येन विविधक्षेत्रेषु वर्तमानसहयोगाय नवीनीकरणाय च गतिः प्राप्स्यते।

<u>विशिष्टम् एकादशवर्षपूर्ताविधौ</u>

विगत-एकादशवर्षेषु, सेवा-सुशासन-निर्धनकल्याणादीनाम् मार्गदर्शकसिद्धान्तैः निर्मितं गहनपरिवर्तनम् भारते दृश्यमानमस्ति। अस्मिन् विशिष्टावसरे, आकाशवाणी-वार्ताप्रभागः महत्त्वपूर्णक्षेत्रेषु सर्वकारस्य प्रभावपूर्णोपक्रमान्, उपलब्धीन् च सामिप्येन अवलोकयति। अद्य वयं मध्यमवर्गस्य सशक्तीकरणार्थं वित्तीयपरिष्काराणाञ्च विषये प्रशासनकृतपरिश्रमं पश्यामः। गतदशकाधिककालात् भारतस्य मध्यमवर्गः राष्ट्रस्य विकासयात्रायाः केन्द्रस्थाने स्थितः अस्ति। कर-परिष्कारः भवतु उतो वा तत्सम्बन्धीनां समाह्वनानामुपशमनम्, सामाजिक-सुरक्षा क्षेत्रे उत कौशल-विकासे वा भवेत् मध्यमवर्गस्य सशक्तीकरणार्थं सर्वकारस्य प्रयत्नानां समुल्लेखः महत्वपूर्णमस्ति।

<u>लॉस-संघर्षः</u>

अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्प् इत्यनेन लास्-एञ्जलीस्-नगरे द्विसहस्रं नेशनल्-गार्ड्-सैनिकान् नियोजयितुं आदेशो दत्तः, येन अनधिकृतप्रवासिनामुपरि कृताक्रमणत्वेन सञ्जातायाः अशान्तेः नियन्त्रणे साहाय्यं भवेदिति मन्यते। अस्मिन् नगरे गतरात्रौ अशान्तिः दृष्टा, यत्र प्रधानतया लेटिनो-मण्डलस्य निवासिनः इमिग्रेशन् एण्ड् कस्टम्स् इन्फोर्स्मेण्ट् इत्यस्य सङ्घीय-अभिकर्तृभिः सह संघर्षं कृतवन्तः।

<u>चौहान-ड्रैगनेति फलस्वरूप :</u>

केन्द्रीयकृषिमन्त्री शिवराजसिंहचौहानः अवदत् यत् कृषिक्षेत्रस्य विकासाय सुलभतया कृषियोग्यफलानां सस्यानाञ्च कृते विविधीकरणं आवश्यकम् इति। 'विकसितकृषि-सङ्कल्प-अभियानस्य' भागत्वेन बेङ्गलूरु-नगरस्य भ्रमणकाले सम्बोधयन् श्री. चौहानः ड्रैगनेति फलस्य कृष्याः लाभान् अधोरेखितवान्।

<u>आकाशवाणी नवति वर्षाणि :</u>

आकाशवाणी अद्य नवतितमं स्थापनोत्सवं परिपालयति। षड्त्रिंशोत्तरैकोनविंशति-शततम -वर्षस्य अस्मिन्नेव दिने आई एस बी एस इत्युक्ते भारतीयराज्यप्रसारणसेवायाः

नाम ऑल इण्डिया रेडियो (AIR) इत्यभिधिया परिवर्तितम् । अयं महत्त्वपूर्णः अवसरः देशस्य सांस्कृतिक-सूचना-प्रसारण-इतिहासस्य महत्त्वपूर्णं क्षणम् अस्ति, एकस्य तादृशस्य स्वरस्य जन्म अजायत् यद्धि सुदीर्घकालं यावत् प्रतिध्वनितुं शक्नोति। तामेव सेवां वयं सम्प्रति आकाशवाणीति नाम्ना प्रतिजानीमः।

निर्वाचनायोगः/राहुल गान्धी':

भारतीय-निर्वाचनायोगः काङ्ग्रेस्-नेत्रे राहुलगान्धिने तस्य आरोपान्नुद्दिश्य प्रत्युत्तरं दत्तवान्। निर्वाचनायोगेनोक्तम् यत् आयोगस्य निर्देशानुसारं केषामपि मतदानकेन्द्राणां सी. सी. टी. वी. दृश्यानि सर्वदा निर्वाचन-याचिकानन्तरं सक्षमोच्चन्यायालयेन परीक्षितुं शक्यन्ते इति। साम्प्रतं यावत् श्रीमता गान्धिना सविधम् आवेदनं कृतं नास्तीत्यपि निर्वाचनायोगेनोक्तम्।

फ्रेंच ओपन टेनिस् :

पञ्चविंशत्यधिक-द्विसहस्रतम- वर्षस्य फ्रेंच ओपन टेनिस् इत्यस्यां क्रीडायां इटालियन-युगलं सारा इरानी, जैस्मीन पावोलिनी चेत्येते क्रीडिके महिलायुगलवर्गस्य क्रीडां विजितवत्यौ। पुरुष- एकलस्पर्धायाञ्च विश्वस्य प्रथमक्रमाङ्कधायिना जैनिक् सिनर् इत्यनेन सह गतविजेता कार्लोस् अल्काराजः साम्मुख्यं करिष्यति।

।। इति वार्ता: ।।